# Svami Vivekanandapranatih

# સ્વામિવિવેકાનન્દપ્રણતિઃ

## Document Information

Text title : Svami Vivekanandapranatih

File name : svAmivivekAnandapraNatiH.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Dakshina Ranjanashastri

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# સ્વામિવિવેકાનન્દપ્રણતિઃ

યદા યદા નિર્મલધર્મદર્પણે
    કલઙ્કરેખા નિપતત્યહો તદા ।
પ્રજાયતે શ્રી ભગવાન્ દયાર્ણવો
    વિશોધનાર્થં ખલુ દર્પણસ્ય ચ ॥ ૧॥

યદા સ્માર્તાચાર્યાઃ શ્રુતિમતવિરોધેન હિ પુન-
    ર્ભજન્તે સઙ્કીર્ણં પ્રભવતિ મતં ભેદવિષયે ।
વિવેકાનન્દોઽયં કથયતિ કથાં ચૌપનિષદીં
    ત્વભેદો જીવાનાં પ્રતિઘટપટં બ્રહ્મવસતિઃ ॥ ૨॥

ન જાતિભેદો ન ચ વર્ણદુષ્ટિ-
    ર્યેનાપિ કેનાપિ તથા ભજસ્વ ।
દયાર્ણવસ્તે શરણં તથા સ્યાદ્
    યથા નદીનાં શરણં સમુદ્રઃ ॥ ૩॥

યા ભેદબુદ્ધિર્વિહિતા તુ શાસ્ત્રે
    સાજ્ઞાનલાભં વિહિતા ન પશ્ચાત્ ।
જ્ઞાને પ્રજાતે ન હિ વિદ્યતે સા
    સમન્વયઃ સર્વગતો વિભાતિ ॥ ૪॥

ઉદારતા યસ્ય હિ સાર્વભૌમિકી
    ન દ્વેષલેશોઽપિ ચ યસ્ય માનસે ।
સર્વાસ્તુ નાર્યો જનનીવ પૂજિતા
    નરાશ્ચ નારાયણવત્ સુમાનિતાઃ ॥ ૫॥

વેદાન્તતન્ત્રેષુ કથાવિચારે
    યસ્યૈવ બુદ્ધિઃ કુશવત્સુતીક્ષ્ણા ।
"ધર્મસ્ય તત્વં નિહિતં ગુહાયાં"
    સઙ્ગૃહ્ય યો યચ્છતિ સર્વજીવે ॥ ૬॥

દરિદ્રનારાયણ સેવનાદિ લક્ષ્યં હિ
    યસ્યૈવ ચ નિત્યમાસીત્ ।
શ્રીરામકૃષ્ણસ્ય વરેણ્ય શિષ્યં
    નરેન્દ્રનાથં પ્રણતા નમામઃ ॥ ૭॥

ધન્યોઽસિ હે ધર્મસમન્વયાર્થિન્ !
    “ધર્મે ગુરુર્ભારતવર્ષભૂમિઃ” ।
ત્વયૈવ દેશાન્તરસંસ્થિતેન
    સંસ્થાપિતં ધર્મમહાસભાયામ્ ॥ ૮॥

વીરા વયં નો યદિ શસ્ત્રયુદ્ધે
    શ્રેષ્ઠા વયં ધર્મમયે ચ સઙ્ખ્યે ।
સન્દેહબિન્દૂર્નહિ વિદ્યતેઽસ્મિન્
    ભવત્પ્રસાદાદધુના પૃથિવ્યામ્ ॥ ૯॥

શ્રીરામકૃષ્ણઃ ખલુ ધર્મવૃક્ષ-
    સ્તસ્યાપિ મૂલં શ્રુતિવાક્ સુનિત્યા ।
સ્કન્ધો વિવેકઃ સમુદારચેતા
    આનન્દરૂપા બહવશ્ચ શાખાઃ ॥ ૧૦॥

અસ્ય પ્રશાખાઃ પ્રસૃતાઃ પૃથિવ્યાં
    છાયાદિદાનૈઃ સકલાનવન્તિ ।
સ્કન્ધાત્ પ્રજાતાઃ ફલપુષ્પવત્યઃ
    શાખાસ્તતઃ સ્કન્ધમિમં નમામઃ ॥ ૧૧॥

ઇતિ શ્રીદક્ષિણારઞ્જનશાસ્ત્રી વિરચિતા “સ્વામિવિવેકાનન્દપ્રણતિઃ” સમાપ્તા ।

Proofread by Aruna Narayanan

*Svami Vivekanandapranatih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*